देवभूमि-सौरभम्
Devabhūmisaurabham
Vol 2 Issue 1 July-Dec 2024 Devabhūmisaurabham International Journal of CSU Shri Raghunath Kirti Campus Devprayag Uttarakhand India

# गुणानां रसमात्रधर्मत्वविचारः

**शुभम्**
प्राध्यापकः, एकलव्य आदर्श आवासीयविद्यालयः
पाटी जिला, बडवानी, मध्यप्रदेशः

---

**मुख्यशब्दाः**-गुणाः, रसधर्माः, गुणत्रयम्, दश गुणाः, विंशति गुणाः

**सारांशः-** काव्यगुणानां विषये आलङ्कारिकेषु ऐकमत्यं नास्ति। भरतः दण्डी च दश गुणानङ्गीकुर्वन्ति। सङ्ख्या यद्यपि समाना तथापि गुणविषये तेषां चिन्तनं भिद्यते। वामनः दश शब्दगुणान् दश अर्थगुणांश्च प्रतिपादयति। मम्मटादयः तान् त्रिष्वेव गुणेष्वन्तर्भावयन्ति। केचनालङ्कारिकाः गुणालङ्कारयोः समानताम् अन्ये च केचन भिन्नतां प्रतिपादयन्ति। मम्मटादयः गुणानां रसमात्रधर्मत्वम् अङ्गीकुर्वन्ति। यद्यपि वामनोक्तगुणानां यथायथं माधुर्यौजःप्रसादेषु अन्तर्भावं मम्मटाचार्य-मतानुसारमङ्गीकरोति जगन्नाथः, तथापि गुणानां रसमात्रधर्मत्वविषये तैः सह विभेदवान्। गुणानां रसधर्मत्वविषये जगन्नाथस्य अभिप्राय एवं सङ्गृहीतुं शक्यते-

१. पण्डितराजजगन्नाथानुसारं द्रुतिदीप्तिविकासाख्या चित्तवृत्तय एव क्रमेण माधुर्य-ओज-प्रसादगुणास्सन्ति।
२. शृङ्गारादिरसेषु मधुरादिव्यवहारः प्रयोजकत्वसम्बन्धेन स्वीकृतः।
३. गुणानां स्थितिविषये किञ्चित् पौर्वापर्यं प्रदर्श्य मम्मटाचार्यादीनामनुसारमेव जगन्नाथो गुणानां स्थितिं प्रतिपादयमास।
४. गुणानां रसधर्मत्वस्य यत्खण्डनं विहितम्, तदपि वदतो व्याघातत्वात् शुद्धात्मनः काव्यात्मनश्च भेदत्वाच्चापास्तम्।
५. द्रुत्यादिचित्तवृत्तिनां प्रयोजकत्वं न केवलं रसमधि-तिष्ठति, अपितु शब्दे अर्थे, रचनायाञ्चापि वर्तते।
६. गौणीवृत्त्या गुणानां शब्दार्थगतत्वमिति मम्मटाचार्यमतं निरस्य मुख्यया वृत्त्या गुणानां शब्दार्थगतत्वं रचनागतत्वं जगन्नाथः स्वीचकार।
७. जगन्नाथेन स्वाभिमतं गुणसामान्यलक्षणं नोक्तम्, न च माधुर्यादिगुणानां लक्षणान्युपात्तानि, मम्मटाचार्यमतं समर्थयता काव्ये त्रयो गुणाः स्वीकृताः।
८. विशेषतः जगन्नाथस्य मम्मटाचार्येण सह विरोधो, द्रुत्यादिचित्तवृत्तीनां विषये, गुणानां रसधर्मत्वविषये गौणवृत्त्या गुणानां शब्दार्थगतत्वविषये वर्तते।

प्रयोजकत्वसम्बन्धेन गुणानां रसगतत्त्वमपि पण्डितराजः स्वीकृतवान्। इति शम्।

## शोधपत्रम्-

काव्यगुणानां विषये आलङ्कारिकेषु ऐकमत्यं नास्ति। भरतः दण्डी च दश गुणानङ्गीकुर्वन्ति। सङ्ख्या यद्यपि समाना तथापि गुणविषये तेषां चिन्तनं भिद्यते। वामनः दश शब्दगुणान् दश अर्थगुणांश्च प्रतिपादयति। मम्मटादयः तान् त्रिष्वेव गुणेष्वन्तर्भावयन्ति। केचनालङ्कारिकाः गुणालङ्कारयोः समानताम् अन्ये च केचन भिन्नतां प्रतिपादयन्ति। मम्मटादयः गुणानां रसमात्रधर्मत्वम् अङ्गीकुर्वन्ति। यद्यपि वामनोक्तगुणानां यथायथं माधुर्यौजःप्रसादेषु अन्तर्भावं मम्मटाचार्यमतानुसारमङ्गीकरोति जगन्नाथः, तथापि गुणानां रसमात्रधर्मत्वविषये तैः सह विभेदवान्। प्राचीनानां गुणानां रसमात्रधर्मत्ववादे प्रमाणमपश्यन् तन्निराकरोति पण्डितराजः। यतस्तस्य साधकयुक्तिर्नास्ति। प्रत्यक्षानुमानप्रमाणैस्तन्न सिद्ध्यति।

गुणाः रसमात्रधर्मा इत्यस्मिन् विषये मम्मटाचार्यमतमेवं वर्तते - माधुर्यौजोप्रसादेषु गुणेषु माधुर्यं द्रुतेः, ओजः दीप्तेः, प्रसादो विकासस्य प्रयोजकमेव, न तु जनकम्। तत्तद्गुणयुक्त तत्तद्रसानामास्वाद एव द्रुति-दीप्ति-विकासानां जनकः। अर्थात् द्रुति-दीप्ति-

विकासरूपचित्तवृत्तयः साक्षात् माधुर्य-ओजो-प्रसादगुणेभ्यः साक्षान्नोत्पद्यन्ते, किन्तु तैर्गुणैर्विशिष्टरसास्वादेनैव जायन्ते। शृङ्गार-करुण-शान्तरसानामास्वादेन चित्तं द्रवते, माधुर्यगुणस्य तद्रसधर्मत्वात् । वीर-बीभत्सादीनां रसानामास्वादेन चित्तं दीप्तं भवति, ओजोगुणस्य तद्रसधर्मत्वात् । हास्य-अद्भुतरसानामास्वादेन चित्तं विकसितं भवति, प्रसादगुणस्य तद्रसधर्मत्वात्। एवं गुणानां रसवृत्तित्वात् रसमात्रधर्मत्वं सिद्ध्यति।[1]

एवं चेत् गुणाः केवलं रस एव भवन्ति, न तु रचनादिष्विति सिद्धम्। तर्हि लोके मधुरा रचना, ओजस्वी बन्धः इत्यादिव्यवहारः कथं सम्भवति ? इति जगन्नाथः।

स तु व्यवहार 'आकारोऽस्य शूर' इत्यादिवल्लाक्षणिकः । अर्थात् शौर्यस्यात्मवृत्तित्वेन, अवयवसंस्थानविशेषरूपाकारवृत्तित्वाभावेऽपि आकारोऽस्य शूर इति व्यवहारो यथा सम्भवति लक्षणया, तथैव रसवृत्तयः गुणाः रसाभिव्यञ्जका इति स्वाश्रय-व्यञ्जकत्वसम्बन्धेन ( स्वम्=गुणः, तदाश्रयः=रसः तस्य व्यञ्जकत्वं गुणेषु इति रीत्या) रचनासु बन्धेषु चोपपाद्यन्ते लक्षणया। तदेवोक्तं मम्मटाचार्येण 'गुणवृत्त्या पुनस्तेषां स्थितिः शब्दार्थयोर्मता' [2] इति।

किन्त्वेतस्मिन् विषये प्रमाणमपश्यन् जगन्नाथः तत्र प्रत्यक्षस्य प्रमाणत्वमेवं निवारयति। लोके एकस्य वस्तुनः कार्यभूतयोः द्वयोः पदार्थयोः पृथगनुभवः प्रसिद्धः। यथा, अग्नेः कार्यं दाहः, उष्णस्पर्शश्च। तत्रापि दाहः कार्यम्, उष्णस्पर्शस्तु गुणः। तयोर्भेदात् दाहरूपकार्यात् पृथगग्नेरुष्णस्पर्श-रूपगुणोऽनुभूयते सर्वैः । तत्र प्रत्यक्षम् । तथैव यद्यङ्गीक्रियते तर्हि, रसानां कार्येभ्यो द्रुत्यादिचित्तवृत्तिभ्यः पृथग् रसनिष्ठानां माधुर्यादीनां गुणानामनुभवो भवितव्यः। किन्तु न जायते द्रुत्यादेः, गुणस्य माधुर्यादेरभिन्नतया।

"द्रुत्यादिनिष्ठकार्यतानिरूपिता रसनिष्ठा कारणता किञ्चिद्धर्मावच्छिन्ना कारणतात्वात्" इत्यनुमानेन तत्सिद्ध्यतीति प्राचीनमतम् एवं खण्डयति- "परमनुमानेनानेन गुणानां रसधर्मतासाधनं न युक्तम्। द्रुत्यादिचित्तवृत्तिं प्रति रसः तत्तद्गुण-वैशिष्ट्येन उत तत्तद्रसत्वेन कारणमिति विचारे, द्रुत्यादि-गुणविशिष्टरसानाञ्च कार्यकारणभावाङ्गीकारे गौरवम्, गुणविशिष्टरसानामेव, न तु केवलरसादीनां, द्रुत्यादीनां प्रति कारणत्वाङ्गीकारात्। तदपेक्षया प्रातिस्विकरूपेण अर्थात् शृङ्गारत्व, वीरत्वादिरूपेण रसानां द्रुत्यादीनां प्रति कारणत्वाङ्गीकारे लाघवम्।"

तथाऽङ्गीकारे नव कार्यकारणभावा कल्पनीया भवन्ति-शृङ्गारः द्रुतेः कारणम्, करुणः द्रुतेः कारणम्, शान्तः द्रुतेः कारणम्, वीरो दीप्तेः कारणम्, बीभत्सः दीप्तेः कारणम्, रौद्रः दीप्तेः कारणम्, अद्भुतः विकासस्य कारणम्, हास्यः विकासस्य कारणम्, भयानकः विकासस्य कारणम्-इतिरीत्या। तदपेक्षया द्रुतिं प्रति माधुर्यवद्रसः कारणम्, दीप्तिं प्रति ओजोवद्रसः कारणम्, विकासं प्रति प्रसादवद्रसः कारणमिति त्रय एव कार्यकारणभावा इति लाघवमेव खलु ? इत्येतं प्राचामभिप्रायमेवं खण्डयति-

"तत्तु क्लृप्तानाम् (अनिवार्याणां) शृङ्गारादीनां कारणता-वच्छेदकत्वाभाव एव। किन्तु क्लृप्तानां कारणत्वेऽबाधितेऽक्लृप्तानां कारणतावच्छेदकता नाङ्गीकर्तुमुचिता, अर्थात् सामान्येन कार्यकारणभावसम्भवे विशेषेण तदङ्गीकारो नोचित इत्यक्लृप्तानां माधुर्यत्वादीनामपेक्षया क्लृप्तानां शृङ्गारत्वादीनामेव (गुणं द्वारमकृत्वा) कारणतावच्छेदकत्वाङ्गीकार लाघवं भजते"।

अपि च शृङ्गारादीनां माधुर्यवत्त्वेन द्रुतिकारणत्व-मित्याद्यङ्गीकारे लाघवं न सम्भवति, प्रत्युत प्रातिस्विकापेक्षया गुणद्वारकस्य गौरवमेव। शृङ्गारत्वादिना कारणत्वकल्पने यथा नव कार्यकारणभावा भवन्ति, किन्तु माधुर्यादीनां कारणत्वकल्पने द्वादश। त्रयाणामपि गुणानां मधुर-मधुरतर-मधुरतमत्वेन शृङ्गारशान्तादिष्वङ्गीकृतत्वात्तत्रापि द्रुति-अतिद्रुति-अतितम-द्रुतिरितिरीत्या कार्यस्य त्रैविध्यात्, द्रुतिं प्रति माधुर्यवान् सम्भोगः कारणम्, अतिद्रुतिं प्रति नितरां माधुर्यवान् करुणः/शान्तः कारणम् अतितमां द्रुतिं प्रति नितरां माधुर्यवान् विप्रलम्भः कारणम् इति त्रयः सङ्कलनया नव कार्यकारणभावा विशेषरूपेण, त्रयश्च भवदभिमताः सामान्यरूपेणेति सङ्कलनया, सामान्य-विशेषयोर्योगेन द्वादशानां कार्यकारणभावानां कल्पनीयत्वाद् भवतां लाघवस्थाने गौरवमेवावश्यमापतति।

एवं प्रातिस्विकरूपेणैव कारणत्वे लाघवम् । अतः माधुर्यवत्त्वेन द्रुतिकारणत्वमित्यादेर्निराकरणात् गुणानां रसमात्रधर्मत्वं प्रत्याख्यातमेव।

गुणं द्वारमकृत्वा प्रातिस्विकरूपेणैव कार्यकारणभावाङ्गी-कारेऽपि गुणा रसधर्मा इति तु सिद्ध्यत्येव। शृङ्गार-वीर-हास्यरसाः रसत्वेन द्रुति-दीप्ति-विकासानां कारणानि भवन्तीत्यङ्गीकारेणापि गुणानां रसधर्मत्वं सिद्ध्यति। सर्वे रसा ब्रह्मरूपाः, एकत्वविशिष्टाश्च। अतः शृङ्गारः माधुर्यगुण-शालित्वादेव द्रुतिकारणम्, वीरः ओजोगुणशालित्वादेव दीप्तिकारणमित्यङ्गीकरणीयमेव भवति । तदा

---

[1] का. प्र. अष्टमोल्लासः-कारिका- ६८,६९,७०

[2] का. प्र. अष्टमोल्लासः कारिका सङ्ख्या - ७१

प्रातिस्विकरूप-कार्यकारणभावेनापि कारणतावच्छेदकरूपेण गुणानां रसधर्मत्वं सिद्ध्यत्येव इत्येतदभिप्रायं प्राचीनानामेवमुत्तरयति जगन्नाथः-"गुणाः रसधर्मा इत्युक्तं भवद्भिः । तत् कथं सङ्गच्छते ? यतो हि सच्चिदानन्दस्वरूपो निर्गुण आत्मेति वेदान्तसिद्धान्तः । तथैव काव्यात्मनो रसस्यापि निर्गुणत्वमेव खलु सङ्गच्छते ? अत आत्मरूपरसे गुणत्वं माधुर्यादीनामनुपपन्नम् ।

माधुर्यादिगुणानां रसोपाधिस्वरूपस्थायिभावगुणत्वमङ्गी-क्रियताम् इति प्राचीनैरुक्ते सति जगन्नाथ एवं निवारयति- "तस्यासङ्गतिः द्विधा वक्तुं शक्यते। प्रथमतया प्रमाणाभावः । द्वितीयतया तु गुणे गुणानङ्गीकार इति नियमः । काव्यप्रकाशकारादिविद्वद्भिः रत्यादयः सुखरूपाः । सुखस्य चतुर्विंशतिगुणेषु पठितत्वात् रत्यादयोऽपि गुणा एव । तेषु गुणेषु माधुर्यादयो गुणा कथं भवन्ति, गुणे गुणानङ्गीकारात् ? "

शृङ्गारादिरसेषु माधुर्यादिगुणानङ्गीकारे शृङ्गारो मधुरः, वीर ओजस्वीत्यादयो व्यवहारा कथम् उपपद्यन्ते ? इत्याकारकः प्राचीनानां प्रश्न एवं समाधीयते जगन्नाथेन-"उपपद्यते, द्रुत्यादिचित्तवृत्तिप्रयोजकत्वेन । परम्परासम्बन्धेन कारणत्वाङ्गीकारेण माधुर्यादीनां गुणत्वम् ।"

किन्तु तथाङ्गीकारेऽपि माधुर्यादीनां द्रुत्यादिस्वरूपेण भानं न भवतीति प्रयोजकतात्वादिकल्पना करणीया भवति । तेन गौरवं खलु ? इत्यस्य प्रश्नस्य,

"तर्हि द्रुत्यादितादूप्येण (प्रयोजकतासम्बन्धेन) द्रुत्यादीनां माधुर्यादीनाञ्च अभेदमङ्गीकृत्य द्रुत्यादिचित्तवृत्तय एव गुणाः, तेषां रसैः सह प्रयोजकतासम्बन्धेन माधुर्यादीनां गुणत्वमित्य-ङ्गीक्रियताम् । कल्पेऽस्मिन् प्रयोजकतायाः सम्बन्धकोटा-वानयनात्, संसर्गकुक्षिप्रविष्टानां स्वरूपतो भाननियमाच्च प्रयोजकतासम्बन्धवतां माधुर्यादीनां द्रुत्यादिस्वरूपेण भानमुपपद्यते । एतस्य सहृदयहृदयप्रमाणकत्वात् नात्र मानाभावशङ्का। " इति उत्तरं दत्तम् ।

तेनापि 'शृङ्गारो मधुर' इति प्रयोगस्त्वनुपपन्न एव, प्रयोजकतासम्बन्धस्य वृत्तिनियामकत्वाभावात् । इति पृष्टे सति, "यद्यपि वाजि(अश्व)गन्धा न उष्णा, किन्तु उष्णतायाः प्रयोजिका एव, तथापि प्रयोजकता-सम्बन्धेन वागिगन्धोष्णा इति प्रयोग उपपद्यते खलु ? तथैव शृङ्गारो मधुर इत्यादावपि ।" इत्युक्तम् ।

यद्येवं तर्हि माधुर्यादयो यथा द्रुत्यादीनां प्रयोजका भवन्ति, तथा ईश्वर-काल-अदृष्टानि अपि द्रुत्यादीनां प्रयोजकानि भवन्ति तेषां कार्यमात्रप्रयोजकत्वात् । तर्हि तेष्वपि माधुर्यादिव्यवहारः प्रसज्यते खलु ? इत्यस्य प्रश्नस्य, "रसगता द्रुत्यादिप्रयोजकता असाधारणी, अदृष्टादिगता तु साधारणीति अदृष्टादिविलक्षणं शब्दार्थ-रस-रचनागतप्रयोजकत्वं ग्राह्यम् । अतोऽदृष्टं मधुरमित्यादिव्यवहाराप्रसक्तिः ।" इत्युत्तरं जगन्नाथस्य ।

एतादृशाङ्गीकारस्य फलं किम् ? इत्युक्ते अनेन शब्दार्थरचनासु तस्य साक्षाद्वृत्तित्वसिद्धेः 'मधुरा रचना', 'ओजस्वी बन्ध' इत्यादौ लक्षणाश्रयणस्यावश्यकता नास्ति ।

अत गुणा माधुर्यादयो शब्दार्थरचनानामपि धर्मा भवन्ति, न केवलं रसमात्रधर्माः । "वर्णरचनाविशेषाणां माधुर्यादिगुणाभिव्यञ्जकत्वमेव, न रसादिव्यञ्जकत्वम्, गौरवान्मानाभावाच्च । न हि गुणाभिव्यञ्जनं विना गुणाभिव्यञ्जकत्वं नास्तीत्यस्ति नियमः, इन्द्रियत्रये व्यभिचारात्" इत्यनेन ग्रन्थेन वर्णरचनाविशेषाणां गुणाभिव्यञ्जकत्वं विनाऽपि माधुर्यादिगुणाभिव्यञ्जकत्वमस्तीति सयुक्तिकः कश्चित्सिद्धान्तः पण्डितराजेनाविष्कृतः ।

आत्मनो निर्गुणत्वात् रसस्य धर्मा गुणा न वर्तन्ते इति यज्जगन्नाथेन कथितं तत् सुसमीचीनं न प्रतिभाति, यतो हि मम्मटाचार्योक्तकाव्यलक्षणं खण्डयता जगन्नाथेन प्रतिपादितं काव्य-लक्षणे गुणालङ्कारयोर्निवेशो न युक्तः ।[3] यतोहि शौर्यादय आत्मनो धर्माः सन्ति, शब्दार्थशरीरे गुणानां स्थितिरसम्भवैव अर्थात् गुणाः शौर्यादिवत्, काव्यस्यात्मनो रसस्य धर्मा वर्तन्ते नतु काव्य शरीरघटकाः ।[4] उपमानुप्रासादयोऽलङ्काराः काव्यस्य शब्दार्थमयं शरीरमलङ्कुर्वन्ति, अतो गुणालङ्कारयोः काव्यलक्षणे उपादानं न समीचीनम् । उपर्युक्तप्रकारेण पण्डितराजजगन्नाथमते गुणानां रसधर्मत्वं सिद्ध्यति, परं मम्मटाचार्येण गुणानां यद् रसधर्मत्वमभिहितमस्ति तत्खण्डयितुं

---

[3] लक्षणे गुणालङ्कारादिनिवेशोऽपि न युक्तः । - र. गं. प्रथमाननम् पृ. सं. २१

[4] शौर्यादिवदात्मधर्माणां गुणानां हारादिवदुपस्कारकाणामलङ्काराणां च शरीरघटकत्वानुपपत्तेश्च । र. गं. प्रथमाननम् पृ. सं २४

जगन्नाथेन कथितं यदात्मा निर्गुणोऽस्ति, अतः काव्यस्य रसरूपात्मनि माधुर्यादिगुणानां रसधर्मत्वेन प्रतिपादनं नोचितम् ।[5] अत्र जगन्नाथस्य स्ववचनस्यैव व्याघातो विद्यते ।

प्रतिपादितदृशा पण्डितराजजगन्नाथो वेदान्तमतमवलम्ब्य आत्मा निर्गुणोऽयमिति मत्वा गुणानां रसधर्मत्वमिति ध्वनिप्रतिष्ठापकाचार्याणामथवा रसादीनां निश्च्योतभूतस्य मतस्य यत् खण्डनं कृतवान्, तदौचित्यं न धत्ते । न्यायदर्शनानुसारं जीवात्मनि सङ्ख्यापरिमाणपृथक्त्वादयो चतुर्दश गुणास्तिष्ठन्ति सङ्ख्यापरिमाणपृक्त्वादयोऽष्टौ गुणाः परमात्मनि निवसन्ति ।[6] गुणाश्रयत्वं द्रव्यत्वमिति द्रव्यलक्षणदृशाऽपि गुणात्मनोः सम्बन्धो विद्यत एव ।[7] आत्मनो बृहत्तत्त्वं परमात्मा, परमात्मनोंऽश एवात्मा । परमात्मा उपर्युक्तरीत्यनुसारं सगुणो वर्तते, अस्मात् कारणात् काव्यस्य रसमय आत्मापि माधुर्यादि गुणसहितो विद्यते । अतो जगन्नाथदृशा गुणानां रसधर्मत्वस्य निरासो दुराग्रहपूर्वकमेव प्रतिभाति । जीवात्मा विविधशरीरेषु भिन्न भिन्न प्रकारेण सुखदुःखादिकमनुभवति । आत्मा एकएक भवति स एव कश्चिद् रक्तः, कश्चिद् सुखी कश्चिद् दुःखी कश्चिन् मुक्तः, कश्चिद्बद्धः, कश्चिन्नीचाभिजनः, कश्चिद् विद्वान्, कश्चिद् जाल्मः इत्यादि प्रकारेण सुख-दुःखादिगुणदोषैर्युक्तो आत्मा भवति ।[8] तस्य निर्गुणत्वं सर्वशास्त्रदृष्ट्या नैव सिध्यति ।

काव्यस्यात्मा तु सर्वत्र शृङ्गारादिरसेषु रूपान्तरिता करुणरौद्रादिरसेष्वपि माधुर्यौजादिधर्मयुक्तः समग्रान् सहृदयान् प्रीणाति । काव्यस्यात्मनो नहि कश्चित् सुहृद् विमुखो भवति, अतः शरीरात्मनः सकाशात् काव्यात्मा सर्वोत्कर्षरूपेण विराजतेतराम् । यदि जगन्नाथेन वेदान्तदृशा काव्यस्यात्मा निर्गुणत्वेन प्रतिपादितः स्यात् तदा रसोऽपि न्यायशास्त्रदृशा रसनाग्राह्यत्वेन स्वीकर्तव्ययोऽभविष्यत् । यदि न स्वीकृतस्तदैतदवगन्तव्यं यदैकशास्त्रस्य शौर्यादय उदाहरणत्वेनोदाहृताः, जगन्नाथेन तु शौर्यादय इवात्मनः इत्यस्मात् गुणलक्षणात् आत्मशब्दं गृहीत्वा वेदान्तशास्त्रानुसारमात्मनो निर्गुणत्वात् काव्यस्यात्मा रसोऽपि निर्गुणत्वेनाभिहितः ।

वैशिषिकदर्शनेऽपि द्रव्यगुणकर्मणां समानधर्मत्वं निरूपितम्।[9] तथा रूप,रस,गन्ध इत्यादीनां काव्यगुणेषु समानजातीयरूपादिकारणानां गुणा असमवायिकारणत्वेन भवन्ति[10] यथा पटरूपे तन्तवः । वेदान्ते शुद्धात्मा निर्गुणो भवति स आत्मा मायाप्रभृतिभिर्गुणैर्न लिप्यते, परं काव्यस्यात्मा रसो रत्यादिस्थायिभावैर्युक्तोऽस्ति, अतः तस्मिन्नात्मनि माधुर्यौजः प्रसादाख्या गुणा धर्मत्वेन स्थातुं प्रभवन्तीति ।

काव्यात्मनः शुद्धात्मनश्च परस्परं तारतम्यं विधाय काव्यात्मा रसो निर्गुणोऽस्ति इति कथनं नोपपद्यते । जैनदर्शनेऽपि आत्मनो गुणस्य यद् ज्ञानं तत् समवायसम्बन्धेन आत्मनि तिष्ठतीति जैनमतेऽपि आत्मा गुणेभ्यः पृथग्भूतो न वर्तते ।[11] साहित्यशास्त्रे काव्यस्यात्मा रसः विभावादिभिर्व्यञ्जितश्चर्वणीयः ब्रह्मास्वादमिवानुभावयन्नलौकिकतामेति अतोऽस्ति रसस्य धर्मा गुणा भवन्तीति यद् मम्मटाचार्यादिभिः प्रतिपादितम् तत् समीचीनमेव प्रतिभाति । गुणानां रसधर्मत्वविषये जगन्नाथस्य अभिप्राय एवं सङ्गृहीतुं शक्यते-

९. पण्डितराजजगन्नाथानुसारं द्रुतिदीप्तिविकासाख्या चित्तवृत्तय एव क्रमेण माधुर्य-ओज-प्रसादगुणास्सन्ति ।

१०. शृङ्गारादिरसेषु मधुरादिव्यवहारः प्रयोजकत्वसम्बन्धेन स्वीकृतः ।

११. गुणानां स्थितिविषये किञ्चित् पौर्वापर्यं प्रदर्श्य मम्मटाचार्यादीनामनुसारमेव जगन्नाथो गुणानां स्थितिं प्रतिपादयमास ।

१२. गुणानां रसधर्मत्वस्य यत्खण्डनं विहितम्, तदपि वदतो व्याघातत्वात् शुद्धात्मनः काव्यात्मनश्च भेदत्वाच्चापास्तम् ।

१३. द्रुत्यादिचित्तवृत्तिनां प्रयोजकत्वं न केवलं रसमधि-तिष्ठति, अपितु शब्दे अर्थे, रचनायाञ्चापि वर्तते ।

---

[5] किञ्चात्मनो निर्गुणतयाऽऽत्मरूपरसगुणत्वं माधुर्यादीनामनुपपन्नम् । - र. गं. प्रथमानानम् पृ. सं. २२४

[6] जीवात्मनि सङ्ख्या परिमाण पृथकत्वादयः …….. चतुर्दश गुणाः । परमात्मनि च सङ्ख्या परिमाणमित्यादयोऽष्टौ गुणाः । तर्कसङ्ग्रहः. पृ. सं. ३२

[7] तर्कसङ्ग्रहः.पृ. सं. ६

[8] तर्कसङ्ग्रहः. पृ. सं. ३३

[9] द्रव्यगुणकर्मणां द्रव्यं कारणं सामान्यम् । वै. सू. १/१/१८

[10] कार्यगुणानां रूपरसादीनां सजातीयकारणगुणानामसमवायिकारणकत्वम् । तत्रैव वृत्तौ पृ. सं. ५९

[11] यद्यात्मनो ज्ञानादव्यतिरिक्तत्वमिष्यते तदा दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तराभावात् बुद्ध्यादीनां न वा मानात्मविशेषगुणानामुच्छेदावसर आत्मनोऽप्युच्छेदः स्यात्, तदव्यतिरिक्तत्वात् । भिन्नमेवात्मनो ज्ञानं यौक्तिकमिति । स्याद्वादमञ्जरी । अन्य.यो.व्य. श्लोक ८, पृ. सं. ५२

१४. गौणीवृत्त्या गुणानां शब्दार्थगतत्वमिति मम्मटाचार्यमतं निरस्य मुख्यया वृत्त्या गुणानां शब्दार्थगतत्वं रचनागतत्वं जगन्नाथः स्वीचकार।

१५. जगन्नाथेन स्वाभिमतं गुणसामान्यलक्षणं नोक्तम्,   न च माधुर्यादिगुणानां लक्षणान्युपात्तानि, मम्मटाचार्यमतं समर्थयता काव्ये त्रयो गुणाः स्वीकृताः।

१६. विशेषतः जगन्नाथस्य मम्मटाचार्येण सह विरोधो, द्रुत्यादिचित्तवृत्तीनां विषये, गुणानां रसधर्मत्वविषये गौणवृत्त्या गुणानां शब्दार्थगतत्वविषये वर्तते।

प्रयोजकत्वसम्बन्धेन गुणानां रसगतत्त्वमपि पण्डितराजः स्वीकृतवान् । इति शम्।